श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्वेङ्कटशेषार्यानुगृहीता

# ॥ श्रीपद्मनाभकटाक्षनक्षत्रमाला ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीपद्मनाभकटाक्षनक्षत्रमाला ॥

वन्दे वेङ्कटशेषार्यं वत्सवंशशिरोमणिम्।
वात्स्यश्रीवरदाचार्यतनयं करुणानिधिम्॥

कामं काङ्क्षितसिद्ध्यै प्रथमगुरुं नौमि पद्मनाभमहम्।
प्राचार्यमण्णयार्यं स्वाचार्यं सुन्दरार्यगुरुवर्यम्॥ 1 ॥

भार्गवीप्रभया भ्राजद्वक्षोभागेन भास्वरम्।
भजतामभयोद्युक्तं पद्मनाभमहं भजे॥ 2 ॥

श्रीपद्मनाभ ! महिते तव सन्निधाने
का शक्तिरस्ति मम वर्णमपीह वक्तुम्।
स्तोतुं पुनः किमु दयाजलधे ! तवैव
काऽपि प्रसक्तिरिह मां मुखरीकरोति॥ 3 ॥

पुत्रस्नुषाशयनवाहननेत्रयुग्म -
पौत्रादिमेषु तव सत्स्वपि तादृशेषु।
को वा न ते सविधमेत्य गुणानवोचत्
नाप्लावितस्तव दयाशिशिरैरपाङ्गैः॥ 4 ॥

श्रीपद्मनाभ ! ललितं तव दिव्यमूर्ति -
रूपानुरूपमहमाभरणं प्रदित्सुः।
आत्मन्यशक्तिमथ वीक्ष्य करोमि वाचा
नक्षत्रगुम्भनलसन्नवरत्नमालाम्॥ 5 ॥

आपुर्यदीयलवतः कुलशेखराद्याः
श्रीपुष्टिमश्वयुगनर्घगजादिहृद्याम्।

या पुण्यराशिविभवेषु विहारशीला
    सा पद्मनाभ ! तव पातु कटाक्षमाला ॥ 6 ॥

त्वामेकदैवतधिया शरणं प्रपन्नं
    क्षामेतरात्मकरुणाभरणीयमेनम्।
श्रीपद्ममञ्जुलमुखेन्दुविहारहेला
    श्रीपद्मनाभ ! तव पातु कटाक्षमाला ॥ 7 ॥

श्रीपद्मसम्भवमुखैरनघैर्मखाशैः
    या कृत्तिकापटधरेण समं मखाशैः।
आपद्यते शरणमाश्रितपक्षपाला
    श्रीपद्मनाभ ! तव पातु कटाक्षमाला ॥ 8 ॥

आरोहिणीं दिशति सम्पदमृद्धिमूलां
    या रोहिणीशसुधयेव सदार्द्रशीला।
तापत्रयप्रशमनोपहितात्मलीला
    सा पद्मनाभ ! तव पातु कटाक्षमाला ॥ 9 ॥

किं पद्मजात् मृगशिरः करतोऽन्यतो वा
    सम्पन्नमस्तु कृपणान् कृपणा भजन्ते।
आपं चतुर्विधपुमर्थमहाफलाय
    श्रीपद्मनाभ ! तव दिव्यकटाक्षमालाम् ॥ 10 ॥

आर्द्रापराधमपि मामनुकम्पनीयं
    सार्द्रावलोकनसुधारसवर्षिणीयम्।
हे पङ्कजाक्ष ! करुणानृतिचन्द्रशाला
    श्रीपद्मनाभ ! तव पातु कटाक्षमाला ॥ 11 ॥

प्राग्जन्मपुण्यविरहात् वसुहीनमेनं
    वाग्जन्यसंस्तवगुणैरुदयद्विकासम्।

पापं पुनर्वसुयुतं विदधात्वसौ मां
श्रीपद्मनाभ ! तव दिव्यकटाक्षमाला ॥ 12 ॥

पुष्यत्प्रभापरिचितां पुनरुक्तशीतां
हृष्यत्प्रपन्नकुलरक्षणबद्धदीक्षाम्।
स्वापं विनैव सुखदानमहे विलोलां
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम् ॥ 13 ॥

स्वामिन् ! सदा करुणया हितया विभास्व -
दाश्लेषया जनितसर्वजनप्रसादाम्।
श्रीमन्ननन्तपुरदिव्यविमानधामन् !
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम् ॥ 14 ॥

पद्मोद्भवश्च स भवो मघवा च शास्ता
सद्मोपरि स्थितिजुषस्तव संस्तवाशाः।
आपन्निवारणचणां इति यां स्तुवन्ति
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम् ॥ 15 ॥

वल्गु त्वदीयपदपद्मरतिं विहाय
फल्गुन्यहं व्यथितधीः विषये हि पूर्वम्।
आप श्रमं शमयितुं तमनन्तशायिन् !
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम् ॥ 16 ॥

सर्वोत्तरा तव दया यदि फल्गुनीयं
गर्वोत्तराऽपि सुखिता मम धीश्शुभा स्यात्।
धीपञ्जरे मम सदैव यथा भवान् स्यात्
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम् ॥ 17 ॥

न्यस्ते भरे त्वयि मया सहसैव सर्वं
हस्ते भवेदिति फलं दृढनिश्चयोऽहम्।

प्रापं तवैव चरणौ शरणं शरण्यौ
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम्॥ 18॥

अत्राखिलेश ! भुवने परिचिन्त्यमाने
चित्रा विभाति तव विश्वजनीनरीतिः।
आपन्नजातमखिलस्य गुहाशयात्मन् !
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम्॥ 19॥

स्वातीप्सिता न कुरुते त्वयि काऽपि भक्तिः
नातीवचित्रमिदमप्यहितेऽत्युदारे।
सापत्रपं विबुधपादपमादधानां
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम्॥ 20॥

कान्तं तवाङ्घ्रियुगलं निगलं हृदो मे
श्रान्तस्य संसृतिपथे शरणं गतस्य।
श्रीमन् ! विशाख मुखलेखकुलैकदेव !
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम्॥ 21॥

सर्वापराधमपि तावकसञ्चितं ते
शर्वादयोऽपि निगदन्ति तवैव भोग्यम्।
आपन्न इत्यविगणय्य ममापराधान्
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम्॥ 22॥

ज्येष्ठा भवन्ति गुणशीलमुखैश्च बोधे
श्रेष्ठाः परे कति कतीह न वा तवेष्टाः।
रूपं स्वमप्यविदुषि स्वयमेव बाले
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम्॥ 23॥

शीलं न वीक्ष्य दयते हि भवान् प्रपन्ने
मूल ! त्वमेव शरणं मम हे भवेति।

द्वैपं वचोऽपि हृदये सदयेऽह्यभूद्यत्
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम् ॥ 24 ॥

आषाढभूतिरिव पूर्वमहं महत्सु
वेषान्तरेण रचितुं कपटं पटीयान्।
हे पङ्कजाक्ष ! तव दास्यसुखी कथं स्यां
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम् ॥ 25 ॥

आषाढमुत्तरमुडुं मम जन्मतारं
शेषा वदन्ति परमेव तव प्रसक्तेः।
आपादने न वितथं विदधान एतत्
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम् ॥ 26 ॥

जातायतादमलमाश्रवणात् सुजातात्
भीताभयप्रदरुचेः नयनाम्बुजातात्।
आपन्नरक्षणविधौ अतिमात्रलोला
श्रीपद्मनाभ ! तव पातु कटाक्षमाला ॥ 27 ॥

त्वत्कीर्तनं तव कथाश्रवणं तवार्चा
सत्कीर्तिहेतुमपि सङ्गतिकारणानि।
के पङ्कमोचनचणं न विदन्ति धीराः
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम् ॥ 28 ॥

युक्तात्मनोऽपि भवति त्वमबाधनिष्ठान्
भक्तान् स्वयैव दययाऽभयया तनोषि।
कापथ्यशीलरुचिरस्मि कथं कृती स्यां
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम् ॥ 29 ॥

सन्तापकारिणि भृशंभवसञ्ज्वरे मे
चिन्ताकुलैः शतभिषग्प्रवरैः चिकित्सा।

आपद्यते किमु भवन्तमृतेऽमृतेश !
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम् ॥ 30 ॥

पूर्वं यथाकथमपि स्थितिभागिनोऽपि
चार्धञ्चिताक्षियुगभाद्रपदाहि ते स्युः।
ये पत्रिलास्तव कदाचिदपाङ्गवर्षैः
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम् ॥ 31 ॥

आर्द्रापराधशतमूलमहो नरास्त्व -
दाद्यं तरङ्गिततरङ्गमपाङ्गसङ्गम्।
प्रापप्य देहमथ भाद्रपदोत्तरास्ते
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम् ॥ 32 ॥

घोरेऽवतीह खलु को भवदाववह्नौ
दूरे त्वदेकशरणं च नितान्ततान्तम्।
श्रीप ! क्षमो जनमिमं त्वदृते दयालो
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम् ॥ 33 ॥

आशास्तथैव बहुशोऽनुभवन्ति सर्वाः
आशास्तथाभिजितवैरिगणा भजन्ति।
ये पद्मशोभि तव पादयुगं नतास्ते
श्रीपद्मनाभ ! तव देहि कटाक्षमालाम् ॥ 34 ॥

पद्यावलीयमखिलेश ! तव प्रसत्त्यै
हृद्या भवत्विति समर्पयते विनम्रः।
श्रीपद्मसन्मकरलालितपादपद्म !
श्रीपद्मनाभ ! तव वेङ्कटशेषदासः ॥ 35 ॥

॥ श्री पद्मनाभकटाक्षनक्षत्रमाला समाप्ता ॥